# Gangashtakam 9

# ગઙ્ગાષ્ટકમ્ ૯

## Document Information

Text title : Gangashtakam 9

File name : gangAShTakam9.itx

Category : devii, devI, nadI, aShTaka

Location : doc_devii

Author : Dhundiraja Bhatta

Transliterated by : Anil Kumar Pandey anil.kumar17pandey at gmail.com

Proofread by : Anil Kumar Pandey anil.kumar17pandey at gmail.com

Description/comments : Ganga Jnana Mahodadhi compiled by Acharya Ramapada Chakravarty

Latest update : June 13, 2010

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

June 13, 2020

*sanskritdocuments.org*

# Gangashtakam 9

## ગઙ્ગાષ્ટકમ્ ૯

શ્રીગણેશાય નમઃ ।
ચલદ્વિલોલવીચિવિસ્ખલદ્વિવૃત્તમીનમુ-
    લ્લસત્સહસ્રપત્રવિસ્ફુરત્પરાગપાટલમ્ ।
હિમાચલસ્ખલજ્જલપ્રવાહપાવિતાખિલ-
    પ્રપઞ્ચમિન્દુચૂડમૌલિમન્દિરં મહોઽવતાત્ ॥ ૧॥

રસાલશાલતાલસત્તમાલજાલમાલસ-
    દ્વિશાલભાલભસ્મભૃત્પ્રવાહભાસ્વરં મહઃ ।
સરોજગન્ધસમ્ભ્રમન્મિલિન્દપુઞ્જમઞ્જુલૈ-
    ગુઞ્જમાનજહ્નુનન્દિનીતટં ભજામહે ॥ ૨॥

ચલત્તરઙ્ગમાલમુચ્છલજ્ઝષોર્ણજાલમુજ્વલ-
    ત્પ્રભાવિશાલમાલમમ્બુવીરુધાં ગૃહમ્ ।
પરિજ્વલદ્ભવાનલપ્રભાવલોડિતાખિલ-
    પ્રપઞ્ચસિઞ્ચનામૃતં પુનાતુ જહ્નુજાપયઃ ॥ ૩॥

કરાલતિષ્યકાલકાલસર્પસર્પદુલ્લસત્
    પ્રભાવિષાનલાવસેકસત્સુધારસૈઃ (સમૈઃ) ।
કુરુ ત્વમીશ્વરપ્રિયાઙ્ગને મદઙ્ગસઙ્ગતા-
    ખિલાઘસઙ્ગભઙ્ગમુલ્લસત્તરઙ્ગરિઙ્ગિતૈઃ ॥ ૪॥

નિમજ્જદાગલાલકાલિજાલશાલિસમ્યગુ-
    લ્લસત્સુરૌઘસુન્દરીમુખારવિન્દસુન્દરમ્ ।
મિલત્પુરાર્ભકસ્ફુરત્કરાભિઘાતવિદ્રવ-
    ત્રિરાકુલોરુમીનમમ્બુ ભાતિ શમ્ભુભૂષણમ્ ॥ ૫॥

ઉદઞ્ચદુદ્ધતાખિલચ્છટામિલદ્વિભાવસુ-
    પ્રભાવિડમ્બિતાતિચઞ્ચદભ્રતારકોત્કરમ્ ।
વિલોલવીચિવિસ્ખલત્સમીરનીતસીકરં

પુરારિપત્તનસ્થિતં પુનાતુ પાવનં પયઃ ॥ ૬॥

સુરાધિરાજરાજધર્મરાજમુખ્યનિર્જરા-
 તિરાજિપુણ્યરાશિરોશુસિદ્ધિદા કલૌ (પુનઃ) ।
પરામૃતપ્રદાયિની મુરારિપાદચારિણી
 પુરારિમૌલિમાલિની સુરાપગા વિરાજતે ॥ ૭॥

મહીધરેન્દ્રપન્નગેન્દ્રકુન્દચન્દનદ્રુમ-
 સ્ફુરત્કરીન્દ્રમણ્ડલામૃતદ્રવોપનાયનમ્ ।
મિલન્નિલિમ્પસુન્દરીકપોલપત્રવલ્લરી-
 ગલત્પરાગપિઞ્જરીકૃતં પયઃ પુનાતુ મામ્ ॥ ૮॥

અનન્તભટ્ટસૂરિસૂનુઢુણ્ઢિરાજસત્કવિ-
 પ્રકલ્પિતં વિચિત્રપદ્યચાતુરીવિભૂષિતમ્ ।
સુરાપગાષ્ટકં નરઃ પઠન્નિદં સ યાતિ તત્
 પરં પદં પ્રભૂતભૂમભાગવૈભવઃ (સદા)॥ ૯॥

ઇતિ શ્રીમન્મહીપણ્ડિતધુરશ્ચતુસ્સમુદ્રરાજમાન્યધુલોપનામકાનન્તાત્મજ-
ઢુણ્ઢિરાજભટ્ટ વિરચિતં શ્રીગઙ્ગાષ્ટકં સમ્પૂર્ણમ્ ।

Encoded and proofread by Anil Kumar Pandey anil.kumar17pandey at gmail.com

*Gangashtakam 9*
pdf was typeset on June 13, 2020

Please send corrections to *sanskrit@cheerful.com*